International Journal of Applied Research 2019; 5(8): 276-278




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2019; 5(8): 276-278
www.allresearchjournal.com
Received: 23-06-2019
Accepted: 25-07-2019

**रतीश कुमार मिश्र**
शोधार्थी, उफरदाहा, भाया – नेहरा, जिला–दरभंगा, बिहार, भारत

**Corresponding Author:**
**रतीश कुमार मिश्र**
शोधार्थी, उफरदाहा, भाया – नेहरा, जिला–दरभंगा, बिहार, भारत

# सनातनधर्मे प्रायश्चित्तमहत्त्वम्

**रतीश कुमार मिश्र**

**प्रस्तावना:**

मन्वानुसारेणान्नाद्यजानां जीवानां हिंसया प्रभवं पापं घृतप्राशेनापकृतं स्यात्। दुग्धाहारेण शस्यौषधानां पापाद्विमुच्यते। कृषिकर्मोत्पन्नानां हिंसानामपवर्तनं पयोव्रतेन दिनमेकं गोरनुगमनेन च जायते[1]।

तानवद् वरदानं प्रथितमेव। तद्यथा बृहदारण्यके प्रवाहणो गौतमाय कथयति–वरं भगवते गौतमाय दद्भः। अर्थात् यद् भवतोऽभष्टं तद्दास्यामि। कठोपनिषदि यमो नचिकेतसे वरं ददाति–त्रीन् वरान् वृणीष्वेति।

तं वृक्षा अपसेधन्ति छायांन्ते मोपगा इति।
यो ब्राह्मणस्य सद्धनमभि नारद मन्यते[2]।।
अर्थात् पापिनो जीवने सौरभं न सम्भवति। अत एव पापनिवृत्तिः करणीया।
मानवो जानन्नजानन्नपि पापं चरति।
इन्द्रियाणां प्रसत्रेन धर्मस्यासेवनेन च नरकगमनमिति[3]।

तस्माद् दुर्गतिं विभाव्य नैकोपायैरात्मरक्षणं वैदिककालतः समीहितं दृश्यते। द्विविधा पापनिवृत्तिः सम्भवति। तथाहि–

1. पापं न कुर्यात्।
2. यदि नाम पापं कृतमेव, तर्हि तस्मात् कारणाद् दण्डो नापतेत्।

पापपक्षलनायासंख्योपाया युगप्रवृत्तिमनुसन्धाय निर्दिष्टाः। तेषु प्रार्थना समीचीनतमम्। प्रायः सर्वे देवाः स्तुतिमात्रेणापि पापफलाद्रक्षितुं प्रार्थिता[4] स्तथापि तत्र देवद्वयी सविशेषं महत्त्वं भजते यतो हि नाम इयं द्वयी सर्वत्रानायाससुलभा, प्रत्यक्षमेव पावित्रयकारिणी वर्तते[5]। सा आपः (जलम्), अग्निश्चेति संज्ञिता। तथाहि–

इदमापः प्रवहत यत्किञ्च दुरितं मयि।
यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम्[6]।।
अप नः शोशुचदघमग्ने[7]।
ऋषि–मनीषा प्रथयति–'अनागसः स्याम'[8]। अर्थात् लोके पापं न प्रचरेत्।

नानाविधपापं नैकपर्यायान् परितः कृत्वा वर्णितम्[9]। यथा पुण्येनहलोके परलोके च सुखशान्त्यभ्युदयानां प्राप्तिर्भवेत्तथैव पापेनेहामुष्मिंल्लोके च विपत्ति–दुःखसन्तापानां प्रादुर्भावोऽवश्यम्भावी एव। तद्यथा निरुक्ते भणितम्–पापत्य–मानौवाङेव पतति। अर्थात् नरके पतिति पापः।

अत एव पुण्यानां सञ्चयादपि यतः कुतश्चिज्जातानां पापानां क्षयोऽभीष्टतं कार्यम्।

देवाः पितरश्च पापाद् रक्षितुं समर्था इति निरूढा धारणासीत्। तद्यथा वामदेव ऋषिर्ऋग्वेदे सवितारं प्रार्थयते–

अचित्ती यच्चकृमता दैव्ये जने दीनैर्दक्षैः प्रभूती पुरुषत्वता।
देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः[10]।।

पापान्मुञ्चन्तु पितरो मुञ्चन्त्वंहसः[11]। कुत्सोऽघं (पापं) विनाशयितुमग्निं प्रार्थयते–अप नः शोशुचदघम्[12]। यथार्थवेदे–पितृन् ब्रूमस्ते नो पापमाचरन्तो जना गभीरं पदं (नदकस्थानं) स्वस्मै परिकुर्वन्ति[13]। ते पापाः सन्ति अनृता असत्याः। अर्थादसत्याचरणं मिथ्याभाषणं च पापं नरकाय भवतः। बहूनां देवाना व्रतानि सन्ति। तेषामतिक्रमो मूलपापम्।

पुरा कतिपयमुनीनां मतमासीद्यम् क्वचित् कश्चिज्जनः स्वेच्छया पापं नाचरेदपितु सर्वेश्वरेण प्रेरितः स साधु वासाधु वाचरति[14]।

कस्मात् कारणात् पापं भवतीति विशदयन् ऋषिरापः पवमानं च प्रार्थयते 'एनसो मुञ्चतु' इति। पापं तु मलमेवावद्यं घोषितम्। तत्तु द्रोहेण, अनृतेन, शापेन च प्रादुर्भवति[15]।

पापस्य प्रवर्तकानि अन्यत्रापि दर्शितानि। तद्यथा–सुरा, मन्युः, द्यूतः, अचित्तिः (अनवधानम्) च[16]।

महापापस्यापाकरणाय यज्ञोऽप्यनुष्ठितः[17]। यज्ञप्रकरणे पापस्य स्वीकारेणापि तस्मान्निवृत्तिजार्यते[18]।

देवा विषमतां संदधानानि अघानि परावर्तयितुं समर्था इति विज्ञाय ऋषयस्तान् प्रार्थयन्ते विशेषता आदित्यान्[19]। तद्यथा–

विदा देवा अघानामादित्यासो अपाकृतिम्[20]।
अगस्त्यर्षिः नैकपापानि समं शमयितुं द्यावापृथिव्यौ प्रार्थयते–
देवान् वा यच्चकृमा कच्चिदागः सखायं वा सदमिज्जास्पतिं वा।
इयं धीर्भूया अवमानमेषां द्यावा रक्षतं पृथिवी नो अभ्वात्[21]।
अतिथेः सत्कारेण पापानि विरली भवन्ति[22]।

अन्यत्रापि–

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा।
पूषा नः पातु दुरिताद् ऋतावृधः रक्षा माकिनी अघशंसे ईशत[23]।।

आपः पापं प्रक्षालयतीत्यथर्ववेदे–

आपो मा तस्मात्सर्वस्माद्दुरितात् पान्त्वहंसः।
अरिप्रा आपो अप रिप्रमस्मत् प्रास्मदेनो दुरितं सुप्रतीकाः[24]।।
स्योना मापः पवनैः पुनन्तु[25]।
यजुर्वेदे च– आपः शुन्धन्तु मैनसः[26]।।
अर्थात् जलं मम पापानि प्रक्षालयतु।

त्रिविधिं पापशोधनं सम्भवेदिति अथर्ववेदे (6. 115) ब्रह्मा नामको ऋषिब्रूते। विश्वेदेवाः प्रार्थिताः पापं शोधयन्तिवति निगदितम्।

शतपथब्राह्मणानुसारेण आपः (जलं) शुद्धिं विद्याति[27]।

छान्दोग्योपनिषदि महापातकानि संख्यातानि सन्ति। तद्यथा–स्वर्णचौरः सुरापायी, गुरु–तल्पगामी, ब्रह्मघाती, च पञ्चकस्त्वेतेषां सहचरः[28]। स तु पञ्चमः पञ्चाग्नीनामौपनिषदिकज्ञानेन शुद्धो भवति[29]।

महाभारते गोदानेन च पापप्रक्षालनमिति–

कानिचिद्यानि दुर्गाणि दृष्कृतानि कृतानि च।
तरन्ति चैव पाप्मानं धेनुं ये ददति प्रभो[30]।।

ऋग्वेदे ( 1.106.1–6) मन्त्रेषु 'विश्वस्मान्नो अंहसो निष्पिपर्तन' इति पुनरावर्तने पापेभ्यः पारगमनं समीहितम्।

अथर्ववेदस्यैकादशकाण्डस्य षष्ठसूक्ते पुनरावर्तनेन 22 मन्त्रेषु पाप–निवृत्तरये स्तुतिः[31]। तद्यथा प्रथममन्त्रः–

अग्निं ब्रूमो वनस्पतीनोशधीरुत वीरुधः।
अग्निं बृहस्पतिं सूर्यं ते नो मुञ्चन्त्वंहसः[32]।।

सूक्तेऽस्मिन् न केवलं देवा अपितु पशवः, पक्षिणः, यक्षाः, पर्वताः, समुद्राः, नद्यः, मनीषिणः, यज्ञः, यजमानः, दर्भः, यवः, राक्षसाः, सर्पाः, संवत्सराः, मासाः, विश्वेदेवाः, सपत्नीका इत्यादयः 'मुञ्चन्त्वंहसः' इति प्रार्थना। यजुर्वेदेऽग्निर्दुरितेभ्यो रक्षितुं प्रार्थितः–

अग्निर्नः पातु दुरितादवद्यात्।
परिमाग्ने दुश्चरिताद् बाधस्वा मा सुचरिते भज[33]।

इहलोकेऽपि पापानि फलन्ति नामेति प्रतिपादितमथर्ववेदे। यथातिथ्यदोषा–दातिथेय इष्टापूर्तपयोरसोर्जास्फाति–प्रजाकीर्तिपशुयशाः श्रीसंविद्विहीनो जायते[34]।

यथा पूर्वमुक्तम्– यज्ञेन, स्तुत्या, मनसा जपेन, तपसा प्रायश्चित्तेन वा[35] पापाद्विरतिर्भवेन्नाम। उपनिषदनुसवारेण पुनर्ब्रह्मज्ञानेन पापात् प्रमुच्यते[36]। ब्रह्मज्ञानेन पापात् प्रमोचितो ब्रह्मलोकं गच्छति। गायत्रीमुखमग्निरिति जानन् पुरुषः स्वकृत– पापेभ्योऽनाविल उपतिष्ठते[37]। मरणकाले पापेन पापलोकं नीयते[38]। वैश्वानरविद्यां विजानन् योऽग्निहोत्रं करोति, तस्य सर्वे पाप्मानः प्रदूयन्ते[39]। ब्राह्मणो (ब्रह्मज्ञः) पापेभ्यः सर्वथा निर्लिप्तः। य एवं वेद स पाप्मानं जहाति[40]।

अन्यत्रापि उपनिषत्कालिकब्रह्मदर्शनस्य महत्त्वं पापानामपाकरणदिशि प्रसिद्धं प्रतिभाति। यथा–बृहदारण्यके विद्यत्येनं पाप्मनः ( 5.7.1)। 'शरीरे पाप्मनो हित्वा' इति तैत्तिरीये 2.5.1 । तरति शोकं तरति पाप्मानम्। मुण्उते 2.1.9 । एवं हवै स पाप्मना विनिर्मुक्तः (प्रश्न0–5.5)।

मन्वनुसारेण वेदज्ञ आत्मनः कर्मजं दोषं दहति[41]।

**महात्मनां प्रभावः** – यथा तीर्थदर्शनेनं पापापि अपाक्रियन्ते तथैव महात्मनां दर्शनेनापि सम्भवति। महाभारतस्यारण्यकपर्वणि भीष्मो ब्रह्मर्षि–पुलस्त्यं दृष्ट्वा निवेदनं करोति–

तव संदर्शनादेव मुक्तोऽहं सर्वकिल्विषैः[42]।
भागवते समर्थितमेतत्–
न ह्यम्मयानि तीर्थानि न देवा मृच्छलामयाः।
ते पुनन्युरुकालेन दर्शनादेव साधवः[43]।।

महात्मनां चरितस्य श्रवणेनापि पाप्रणाशो भवतिं वैशम्पायनो महाभारते प्रवदति जनमेजयं प्रति–

हन्त ते कथयिष्यामि ययातेरुत्तरां कथाम्।
दिवि चेह च पुण्यार्थां सर्वपापप्रणाशिनीम्[44]।।

उपनिपद्युगे पापः पाप्मा च समानार्थौ इति नैकशश्चर्चितम्। उपासनेन पापान्मोक्ष इति कौषीतकिब्राह्मणोपनिषदि निगदितम्[45]।

**पापाबरोधनम्**

वैदिकयुगे भ्रूणहत्या भृशं पापमासीत्। ततोऽवरं पापं ब्राह्मणहत्या निर्णीतता[46]। तदा सूर्योदये सूर्यास्ते च शयनं पापमासीत्[47]। नैकविधानि पापानि।

उपपातकिनः सन्ति वेदविहीनः, गुरुछूषकः, नास्तिकः नास्तिकजीवीः, सोमविक्तेता च[48]।

पातिष्ठानां सर्वथा बहिष्कारः समाजे पापवृत्तेरवरोधाय प्रथमोपायः सञ्चिन्तित आसीत्। तेषां संसर्गस्त्याज्य इति घोषः[49]। अन्यत्रापि पूर्वमेव संसर्गजं पापं व्याकृतम्[50]।

बौधायनानुसारेण त्रिविधानि पापानि भवन्ति–पातनीयानि समुद्रसंयानम्, ब्रह्मस्वन्यासापहरणम्, भूम्यनृतम् सर्वपण्ये व्यवहारणम् शूद्रसेवा, शूद्राभिजननं च[51]।
पापानां वैविध्यं तेषां संख्या च कालक्तमेण बृहत्सञ्जाते। तत्रोपपातकानि सन्ति, नैकविधानि गणनापरिधेर्बाह्यानि[52]। कतिपयध्यानाकर्षकाणि उपपातकानि सन्ति–नास्तिकेभ्यो जीविकाग्रहणम्, वेदविस्मृतिः[53], आत्मविक्रयः आकराधिकारः, महायन्त्रप्रवर्तनम्, औषधीनां हिंसा, स्त्रियाजीवः, अशुष्कवृक्षपातनम्, असच्छास्त्राध्ययनम्, सत्रैतानाट्यनृत्यादिकम्[54]।

**संदर्भ–ग्रंथ सूचीः**


1. मनुस्मृति– 11. 141–144
2. अथर्व0– 5. 19.9
3. मनु0–12. 52
4. कृष्णस्मरणं प्रायश्चित्तेष्वनुत्तमम्। (विष्णु0–2.6.39)
5. अस्मादेव कारणात् प्रायः सर्वेषु धार्मिकविधानेषु कलशे वान्यथा वा जलसम्भृतिर्होमादिनाग्नेश्च प्रतिष्ठा चादिकर्म भवति। तीर्थानां परवर्तियुगे महत्त्वं तदेव प्रकटयति।
6. ऋ0– 1.23.22
7. ऋ0–1.97.1–8
8. ऋ0–1.50.15
9. पापस्य पर्यायाः सन्ति–अघम्, आगः, एनस्, अंहस् रिप्रं, दुश्चरितम्, दुष्कृतम्, दुरितम्, द्रुग्धम्।
10. ऋ0–4.54.3
11. अथर्व0–11.6.16
12. ऋ0–1.97.1–8
13. पापासः सन्तो अनृता असन्ता इदं पदमजनता गभीरम् । ऋ0–4.5.5
14. इदमापः प्र वहतावद्यं च मलं च यत्।
    यच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणम्।
    आपो मा तस्मादेनसः पवमानश्च मुञ्चतु।। (6.17)
15. कौषीतकिब्राह्मणोपनिषदि–3.9
16. ऋ0–7.86.6
17. सर्वं वा एतेन पाप्मानमतरन्नपि वा एतेन ब्रह्महत्यामतरन् सर्वं पाप्मानं तरति, तरति ब्रह्महत्यां योऽश्वमेधेन यजते। तै0 सं0 5.3.12.1–2२ शतप0–13.3.11
18. तै0ब्रा0–16.5
19. मैकडानलः पवदति– His (Varuna's) wraths aroused by sin, the infringrment of his ordinances, which he severcly punishes. He removes sin as if untying a rope. Vedic Reader, p.-135.
20. ऋ0–8.47.2
21. ऋ0–1.185.8
22. अथर्व0–9.6.25
23. ऋ0–6.75.10
24. अथर्व0–10.52.22–24
25. अथर्व0–18.3.11
26. यजुर्वेदे–20.20
27. आपोऽस्मान् मातरः शुन्धयन्तु। शत0–3.1.2.11। परवर्तियुगे नदीकासारसरोवरकुण्डादीनां तीर्थत्वं प्रपन्नमित्यत्र मूलितं बिभाति।
28. छान्दोग्य0– 5.10.9
29. छान्दोग्य0–5.10.10
30. महा0 (अनु0) – 77.9
31. अस्य वेदस्य चतुर्थकाण्ठस्य षड्विंशसूक्ते 'ते नो मुञ्चन्त्वंहसः' इति पुनरावर्तनेन सप्त मन्त्राः सन्ति। तेषु द्यावापृथिव्यौ पापनिवारणाय प्रार्थिते।
32. अथर्व0–11.6.1
33. यजुर्वेदे–4.15; 4.28
34. अथर्व0–9.6.31.37
35. तत्तिरीयसंहिता–2.1.4.1; 3.1.3.2; 5.1.9.3; 4.3.12.3.1 । वाज0 सं0 39.12। अथर्व0–14.1.30
36. विज्ञानं ब्रह्म चेद्वेद, तस्माचेन्न प्रमाद्यति, शरीरे पाप्मनो हित्वा सर्वान् कामान् समश्नुते। तैत्तिरीयोपनिषद् 2.5.1 । छान्दोग्ये च ब्रह्मज्ञानेन पापं न श्लिष्यते इति। 4.14.3
37. बृहदारण्य0–5.14.8; तैत्तिरीय0–2.9.1
38. प्रश्न0–3.7
39. छान्दोग्य0–5.24.3
40. बृहदा0–4.4.23
41. बृहदा0–5.5.3
42. मनु0–12.101
43. महा0 (अरण्य0)– 80.19
44. भागवते–10.48.31
45. महा0 (आदि0)–81.9
46. भागवते– 10.48.31
47. महा0 (आदि0)–81.9
48. सूर्योपस्थानेनाहोरात्रेण कृतं पापं नश्यति।
49. तै0सं0– 2.5.12 । काठकसं0–31.7
50. तै0ब्रा0 – 2.8.11
51. शब्दकल्पद्रुमे पृष्ठे 257.49 विधानि उपपातकानि गणितानि।
52. मनु0– 11.180; याज्ञ0–3.26 1 ; अग्निपु0 – 170.172
53. संसर्गस्तु त्रिविधः– प्रथमकोटिकः– योनिसम्बन्धः, पौरोहित्यम्, वेदशिक्षाम्, एकपात्रभोजनम्। द्वितीयकाटिकः एकवाहनासनशय्योद्धरच्छदभोजनपंक्तिभोगः सहाध्ययनं च। तृतीयकोटिकः वार्तालापः, शरीरस्पर्शः, गृहे भोजनम्, दानग्रहणम्। कलियुगे तु केवलं पाप एव त्याज्यः। अन्यथा सत्ययुगे पापस्य जनपद एव त्याज्य आसीत्, त्रेतायुगे ग्रामः द्वापरे तु पापस्य कुटुम्बं सम्बन्धयोग्यं नासीत्। पारस्करगृह्यसूत्रे 1.25–26। संसर्गिणां प्रायश्चित्तेन शुद्धिः।
54. मनु0– 11.59–66